श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ अष्टाक्षरी स्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुजमहादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Srimaan K.N. Sundaram of Bangalore for providing the text of this stotra.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ अष्टाक्षरी स्तुतिः ॥

ओं नमः प्रणवार्थार्थ स्थूल सूक्ष्म क्षराक्षर।
व्यक्ताव्यक्त कळातीत ओंकाराय नमो नमः॥ १ ॥

नमो देवादिदेवाय देहसञ्चारहेतवे।
दैत्यसङ्घ विनाशाय नकाराय नमो नमः॥ २ ॥

मोहनं विश्वरूपं च शिष्टाचार सुपोषितं।
मोह विध्वंसकं वन्दे मोकाराय नमो नमः॥ ३ ॥

नारायणाय नव्याय नरसिंहाय नामिने।
नादाय नादिने तुभ्यं नाकाराय नमो नमः॥ ४ ॥

रामचन्द्रं रघुपतिं पित्राज्ञ्य परिपालकं।
कौसल्यातनयं वन्दे राकाराय नमो नमः॥ ५ ॥

यज्ञाय यज्ञगम्याय यज्ञरक्षकराय च।
यज्ञाङ्ग रूपिणे तुभ्यं यकाराय नमो नमः॥ ६ ॥

णाकारं लोकविख्यातं नानाजन्म फलप्रदं।
नानाभीष्टप्रदं वन्दे णाकाराय नमो नमः॥ ७ ॥

यज्ञकर्त्रे यज्ञभर्त्रे यज्ञरूपाय ते नमः।
सुज्ञान गोचराय अस्तु यकाराय नमो नमः॥ ८ ॥

ओंकारमन्त्र संयुक्तं नित्यं ध्यायन्ति योगिनः।
कामदं मोक्षदं तस्मै ओंकाराय नमो नमः॥ ९ ॥

नारायणः परं ब्रह्म नारयणः परन्तपः।
नारायणः परो देवः सर्वं नारायणस्सदा॥ १० ॥

॥ इति अष्टाक्षरी स्तुतिः सम्पूर्णा ॥